सुंदर कांड निर्णय
(हनूमत्प्रतियानम)
अथ सप्तमोऽध्यायः

ओं । रामाय शाश्वतसुविस्तृतषड्गुणाय सर्वेश्वराय सुखसारमहार्णवाय ।
नत्वा लिलं घयिषुरर्णवमुत्पपात निष्पीड्य तं गिरिवरं पवनस्य सूनुः ॥ ७.१ ॥

चुक्षोभ वारिधिरनुप्रययौ च शीघ्रं यादोगणैः सह तदीयबलाभिकृष्टः ।
वृक्षाश्च पर्वतगताः पवनेन पूर्वं क्षिप्तोऽर्णवे गिरिरुदागमदस्य हेतोः ॥ ७.२ ॥

स्यालो हरस्य गिरिपक्षविनाशकाले क्षिप्त्वाऽर्णवे स मरुतोर्वरितात्मपक्षः ।
हैमो गिरिः पवनजस्य तु विश्रमार्थमुद्भिद्य वारिधिमवर्द्धदनेकसानुः ॥ ७.३ ॥

नैवात्र विश्रमणमैच्चत निः श्रमोऽसौ निः सीमपौरुषगुणस्य कुतः श्रमोऽस्य ।
आश्लिष्य पर्वतवरं स ददर्श गच्चन देवैस्तु नागजननीं प्रहितां वरेण ॥ ७.४ ॥

जिज्ञासुभिर्निजबलं तव भक्षमेतु यद्यत त्वमिच्चसि तदित्यमरोदितायाः ।
आस्यं प्रविश्य सपदि प्रविनिः सृतोऽस्माद देवाननन्दयदुत स्वृतमेषु रक्षन ॥
७.५ ॥

दृष्ट्वा सुरप्रणयितां बलमस्य चोग्रं देवाः प्रतुष्टुवुरमुं सुमनोभिवृष्ट्या ।
तैरादृतः पुनरसौ वियतैव गच्चन चायाग्रहं प्रतिददर्श च सिं हिकाख्यम ॥ ७.६ ॥

लं कावनाय सकलस्य च निग्रहेऽस्याः सामर्थ्यमप्रतिहतं प्रददौ विधाता ।
चायामवाक्षिपदसौ पवनात्मजस्य सोऽस्याः शरीरमनुविश्य बिभेद चाऽशु ॥ ७.७
॥

निस्सीममात्मबलमित्यनुदर्शयानो हत्वैव तामपि विधातृवराभिगुप्ताम ।
लम्बे स लम्बशिखरे निपपात लं काप्राकाररूपकगिरावथ संचुकोच ॥ ७.८ ॥

भूत्वा बिलाळसमितो निशि तां पुरीं च प्राप्स्यन ददर्श निजरूपवतीं स लं काम

।
रुद्धोऽनयाऽश्वथ विजित्य च तां स्वमुष्टिपिष्टां तयाऽनुमत ऐव विवेश लं काम ॥
७.९ ॥

मार्गमाणो बहिश्चान्तः सोऽशोकवनिकातळे ।
ददर्श शिं शपावृक्षमूलस्थितरमाकृतिम ॥ ७.१० ॥

नरलोकविडम्बस्य जानन रामस्य हृद्गतम ।
तस्य चेष्टानुसारेण कृत्वा चेष्टाश्च सं विदः ।
तादृक्चेष्टासमेताया अं गुलीयमदात ततः ॥ ७.११ ॥

सीताया यानि चैवाऽसन्नाकृतेस्तानि सर्वशः ।
भूषणानि द्विधा भूत्वा तान्येवाऽसं स्तथैव च ॥ ७.१२ ॥

अथ चूळामणिं दिव्यं दातुं रामाय सा ददौ ।
यद्यप्येतन्न पश्यन्ति निशाचरगणास्तु ते ।
द्युलोकचारिणः सर्वं पश्यन्त्यृषय ऐव च ॥ ७.१३ ॥

तेषां विडम्बनायैव दैत्यानां वंचनाय च ।
पश्यतां कलिमुख्यानां विडम्बोऽयं कृतो भवेत ॥ ७.१४ ॥

कृत्वा कार्यमिदं सर्वं विशं कः पवनात्मजः ।
आत्माविष्करणे चित्तं चक्रे मतिमतां वरः ॥ ७.१५ ॥

अथ वनमखिलं तद रावणस्यावलुप्य क्षितिरुहमिममेकं वर्जयित्वाऽशु वीरः ।
रजनिचरविनाशं कां क्षमाणोऽतिवेलं मुहुरतिरवनादी तोरणं चाऽरुरोह ॥ ७.१६ ॥

अथाशृणोद दशाननः कपीन्द्रचेष्टितं परम ।
दिदेश किं करान बहून कपिर्निगृह्यतामिति ॥ ७.१७ ॥

समस्तशो विमृत्यवो वराद्धरस्य किं कराः ।

समासदन महाबलम सुरान्तरात्मनो◌ं गजम ॥ ७.१८ ॥

अशीतिकोटियूथपं पुरस्सराष्टकायुतम ।
अनेकहेतिसं कुलं कपीन्द्रमावृणोद बलम ॥ ७.१९ ॥

समावृतस्तथाऽयुधैः स ताडितश्च तैर्भृशम ।
चकार तान समस्तशस्तळप्रहारचूर्णितान ॥ ७.२० ॥

पुनश्च मन्त्रिपुत्रकान स रावणप्रचोदितान ।
ममर्द सप्त पर्वतप्रभान वराभिरक्षितान ॥ ७.२१ ॥

बलाग्रगामिनस्तथा सशर्ववाक्सुगर्वितान ।
निहत्य सर्वरक्षसां तृतीयभागमक्षिणोत ॥ ७.२२ ॥

लिऽनौपमं हरेर्बलं निशम्य राक्षसाधिपः ।
कुमारमक्षमात्मनः समं सुतं न्ययोजयत ॥ ७.२३ ॥

स सर्वलोकसाक्षिणः सुतं शरैर्ववर्ष ह।
शितैर्वरास्त्रमन्त्रितैर्न चैनमभ्यचालयत ॥ ७.२४ ॥

स मण्डमध्यकासुतं समीक्ष्य रावणोपमम ।
तृतीय ऐष चां शको बलस्य हीत्यचिन्तयत ॥ ७.२५ ॥

निधार्य ऐव रावणः स राघवस्य नान्यथा ।
यदीन्द्रजिन्मया हतो न चास्य शक्तिरीक्ष्यते ॥ ७.२६ ॥

अतस्तयोः समो मया तृतीय ऐष हन्यते ।
विचार्य चैवमाशु तं पदोः प्रगृह्य पुप्लुवे ॥ ७.२७ ॥

स चक्रवद भ्रमातुरं विधाय रावणात्मजम ।
अपोथयद धरातळे क्षणेन मारुती तनुः ॥ ७.२८ ॥

विचूर्णिते धरातळे निजे सुते स रावणः ।
निशम्य शोकतापितस्तदग्रजं समादिशत ॥ ७.२९ ॥

अथेन्द्रजिन्महाशरैर्वरास्त्रसम्प्रयोजितैः ।
ततश्च वानरोत्तमं न चाशकद विचालने ॥ ७.३० ॥

अथास्त्रमुत्तमं विधेर्युयोज सर्वदुष्षहम ।
स तेन ताडितो हरिर्व्यचिन्तयन्निराकुलः ॥ ७.३१ ॥

मया वरा विलं घिता ह्यनेकशः स्वयम्भुवः ।
स माननीय ऐव मे ततोऽत्र मानयाम्यहम ॥ ७.३२ ॥

इमे च कुर्युरत्र किं प्रहृष्टरक्षसां गणाः ।
इतीह लक्ष्यमेव मे स रावणश्च दृश्यते ॥ ७.३३ ॥

इदं समीक्ष्य बद्धवत स्थितं कपीन्द्रमाशु ते ।
बबन्धुरन्यपाशकैर्जगाम चास्त्रमस्य तत ॥ ७.३४ ॥

अथ प्रगृह्य तं कपिं समीपमानयं श्च ते ।
निशाचरेश्वरस्य तं स पृष्टवां श्च रावणः ॥ ७.३५ ॥

कपे कुतोऽसि कस्य वा किमर्थमीदृशं कृतम ।
इतीरितः स चावदत प्रणम्य राममीश्वरम ॥ ७.३६ ॥

अवैहि दूतमागतं दुरन्तविक्रमस्य माम ।
रघूत्तमस्य मारुतिं कुलक्षये तवेश्वरम ॥ ७.३७ ॥

न चेत प्रदास्यसि त्वरन रघूत्तमप्रियां तदा ।
सपुत्रमित्रबान्धवो विनाशमाशु यास्यसि ॥ ७.३८ ॥

न रामबाणधारणे क्षमाः सुरेश्वरा अपि ।
विरिंचिशर्वपूर्वकाः किमु त्वमल्पसारकः ॥ ७.३९ ॥

प्रकोपितस्य तस्य कः पुरस्थितौ क्षमो भवेत ।
सुरासुरोरगादिके जगत्यचिन्त्यकर्मणः ॥ ७.४० ॥

इतीरिते वधोद्यतं न्यवारयद विभीषणः ।
स पुच्चदाहकर्मणि न्ययोजयन्निशाचरान ॥ ७.४१ ॥

अथास्य वस्त्रसंचयैः पिधाय पुच्चमग्रये ।
ददुर्ददाह नास्य तन्मरुत्सखो हुताशनः ॥ ७.४२ ॥

ममर्ष सर्वचेष्टितं स रक्षसां निरामयः ।
बलोद्धतश्च कौतुकात प्रदग्धुमेव तां पुरीम ॥ ७.४३ ॥

ददाह चाखिलं पुरं स्वपुच्चगेन वह्निना ।
कृतिस्तु विश्वकर्मणोऽप्यदह्यतास्य तेजसा ॥ ७.४४ ॥

सुवर्णरत्नकारितां स राक्षसोत्तमैः सह ।
प्रदह्य सर्वशः पुरीं मुदाऽन्वितो जगर्ज च ॥ ७.४५ ॥

स रावणं सपुत्रकं तृणोपमं विधाय च ।
तयोः प्रपश्यतोः पुरं विधाय भस्मसाद ययौ ॥ ७.४६ ॥

विलं घ्य चार्णवं पुनः स्वजातिभिः प्रपूजितः ।
प्रभक्ष्य वानरेशितुर्मधु प्रभुं समेयिवान ॥ ७.४७ ॥

रामं सुरेश्वरमगण्यगुणाभिरामं सम्प्राप्य सर्वकपिवीरवरैः समेतः ।
चूळामणिं पवनजः पदयोर्निधाय सर्वां गकैः प्रणतिमस्य चकार भक्त्या ॥
७.४८ ॥

रामोऽपि नान्यदनुदातुममुष्य योग्यमत्यन्तभक्तिपरमस्य विलक्ष्य किंचित ।
स्वात्मप्रदानमधिकं पवनात्मजस्य कुर्वन समाश्लिषदमुं परमाभितुष्टः ॥ ७.४९ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते
श्रीमहाभारततात्पर्यनिर्णये
श्रीरामचरिते हनूमत्प्रतियानं नाम सप्तमोऽध्यायः

www.yousigma.com